# paThitasiddhasArasvatastavaH

# પઠિતસિદ્ધસારસ્વતસ્તવઃ

## Document Information

Text title : paThitasiddhasArasvatastava

File name : paThitasiddhasArasvatastava.itx

Category : devii, sarasvatI, aShTaka, devI

Location : doc_devii

Author : sAdhvIshivAryA

Transliterated by : DPD

Proofread by : DPD

Description/comments : Parishishta 13 of Bhairava Padmavati Kalpa, Jain/Gujarati publication, 1993

Latest update : April 14, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# પઠિતસિદ્ધસારસ્વતસ્તવઃ

વ્યાપ્તાનન્તસમસ્તલોકનિકરૈઙ્કારા સમસ્તા સ્થિરા-
યારાધ્યા ગુરુભિર્ગુરોરપિ ગુરુદેવૈસ્તુ યા વન્દ્યતે ।
દેવાનામપિ દેવતા વિતરતાત્ વાગ્દેવતા દેવતા
સ્વાહાન્તઃ ક્ષિપ ૐ યતઃ સ્તવમુખં યસ્યાઃ સ મન્ત્રો વર ॥ ૧॥

ૐ હ્રીં શ્રીપ્રથમા પ્રસિદ્ધમહિમા સન્તપ્તચિત્તે હિ યા
સૈં ઐં મધ્યહિતા જગત્ત્રયહિતા સર્વજ્ઞનાથાહિતા ।
શ્રીઁ ક્લીઁ બ્લીઁ ચરમા ગુણાનુપરમા જાયેત યસ્યા રમા
વિદ્યૈષા વષડિન્દ્રગીઃપતિકરી વાણીં સ્તુવે તામહમ્ ॥ ૨॥

ૐ કર્ણે ! વરકર્ણભૂષિતતનુઃ કર્ણેઽથ કર્ણેશ્વરી
હ્રીંસ્વાહાન્તપદાં સમસ્તવિપદાં છેત્ત્રી પદં સમ્પદામ્ ।
સંસારાર્ણવતારિણી વિજયતે વિદ્યાવદાતે શુભે
યસ્યાઃ સા પદવી સદા શિવપુરે દેવીવતંસીકૃતા ॥ ૩॥

સર્વાચારવિચારિણી પ્રતરિણી નૌર્વાગ્ભવાબ્ધૌ નૃણાં
વીણાવેણુવરક્વણાતિસુભગા દુઃખાદ્રિવિદ્રાવણી ।
સા વાણી પ્રવણા મહાગુણગણા ન્યાયપ્રવીણાઽમલં
શેતે યસ્તરણી રણીષુ નિપુણા જૈની પુનાતુ ધ્રુવમ્ ॥ ૪॥

ૐ હ્રીં બીજમુખા વિધૂતવિમુખા સંસેવિતા સન્મુખા
ઐં ક્લીઁ સૌઁ સહિતા સુરેન્દ્રમહિતા વિદ્વજ્જનેભ્યો હિતા ।
વિદ્યા વિસ્ફુરતિ સ્ફુટં હિતરતિર્યસ્યા વિશુદ્ધા મતિઃ
સા બ્રાહ્મી જિનવક્ત્રવજલલને લીના તુ લીલાનુ મામ્ ॥ ૫॥

ૐ અર્હન્મુખપદ્મવાસિનિ શુભે ! જ્વાલાસહસ્રાંશુભે
પાપપ્રક્ષયકારિણિ ! શ્રુતધરે ! પાપં દહત્યા શુભે ।
ક્ષાઁ ક્ષીઁ ક્ષૂઁ વરબીજદુગ્ધવલે ! વં વં વહં સ્વાવહા
શ્રીવાગ્દેવ્યમૃતોદ્ભવે ! યદિ ભવે મે માનસે સા ભવે ॥ ૬॥

હસ્તે શર્મદપુસ્તિકાં વિદધતી સત્પાત્રકં ચાપરં
    લોકાનાં સુખદં પ્રભૂતવરદં સજ્જ્ઞાનમુદ્રં પરમ્ ।
તુભ્યં બાલમૃણાલકન્દલલસલ્લીલાવિલોલં કરં
    પ્રખ્યાતા શ્રુતદેવતા વિદધતી સૂક્ષ્મં નૃણાં સૂનૃતમ્ ! ॥ ૭॥

હંસો હંસોતિગર્વં વહતિ હિ વિધૃતા યન્મયૈષા મયૈષા
    યન્ત્રં યન્ત્રં યદેતત્ સ્ફુટતિ સિતતરાં સૈવ યક્ષાવયક્ષા ।
સાધ્વી સાધ્વી શિવાર્યા પ્રવિધૃતભુવના દુર્ધરા યા ધરાયા
    દેવી દેવીજનાર્ચ્યા રમતુ મમ સદા માનસે માનસે સા ॥ ૮॥

સ્પષ્ટપાઠં પઠત્યેતત્ ધ્યાનેન પટુનાષ્ટકમ્ ।
અજસ્રં યો જનસ્તસ્ય ભવનયુત્તમસમ્પદઃ ॥ ૯॥

॥ ઇતિ સાધ્વીશિવાર્યાવિરચિતં પઠિતસિદ્ધસારસ્વતસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by DPD

*paThitasiddhasArasvatastavaH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*